मात्स्ये ।

"घण्टावितानवरतोरणचित्रयुक्तं
नित्योत्सवप्रमुदितेन जनेन सार्द्धम् ।
यः कारयेत् सुरगृहं विविधध्वजाढ्यं
श्रीस्तं न मुञ्चति सदा दिवि पूज्यते च ॥"

ध्वजयष्ट्यादिमानमाह हयशीर्षपञ्चरात्रम् ।
"ध्वजदण्डः प्रकर्त्तव्यो निर्व्रणः सगुणो दृढः ।
तदूर्द्ध्वं ताम्रजं चक्रं सूक्ष्मं कुर्य्याद्द्विजोत्तम ! ॥
प्रासादस्य च विस्तारो मानं दण्डस्य कीर्त्तितम् ।
ध्वजयष्टिर्देवगृहे ऐशान्यां दिशि देशिकैः ॥
स्थापनीयाथ वायव्ये साम्प्रतं ध्वजमुच्यते ।
पट्टकार्पासजौमाद्यैर्ध्वजं कुर्य्यात् सुशोभनम् ॥
एकवर्णं विचित्रं वा घण्टाचामरभूषितम् ।
किङ्किणीजालकोपेतं बर्हिपत्रविभूषितम् ।
शुक्लादिवर्णैर्विप्रादिः क्रमाद्वा कारयेत् ध्वजम् ॥
दण्डाग्राद्धरणीं यावत् हस्तैकं विस्तरेण तु ।
महाध्वजस्तु विख्यातं सर्व्वकामप्रदं शुभम् ॥
ध्वजेन रहितो विप्र प्रासादस्तु वृथा भवेत् ।
पूजाहोमादिकं सर्व्वं जपाद्यं यत् कृतं नरैः ॥"

शिवसर्व्वस्वे ।
"देवेभ्यश्च यहं दद्याद् वाहनैश्चपशोभितम् ।
तुरङ्गेण सूर्य्यस्य हरस्य वृषचिह्नितम् ॥
विष्णवे गरुडाङ्कन्तु दुर्गायै सिंहचिह्नितम् ।
कार्य्यं ध्वजपताकाद्यमन्यथा न कथञ्चन ॥"

गरुडलक्षणमाह नारदपञ्चरात्रे ।
"उपेन्द्रस्याग्रतः पक्षी गुडाकेशः कृताञ्जलिः ।
सव्यजानुगतो भूमौ स्कन्धादौ मणिमण्डितः ॥
पञ्चिजङ्घो नराकृतिस्तुङ्गनासो नराननः ।
द्विबाहुः पक्षयुक्तश्च कर्त्तव्यो विनतासुतः ॥"

विष्णुधर्म्मोत्तरे ।
"प्रतिपाद्य द्विजो दद्यात् ध्वजं त्रिदशवेश्मनः ।
निर्द्दहत्याशु पापानि महापातकजान्यपि ॥"

इति प्रतिष्ठातत्त्वम् ॥ * ॥

अथ ध्वजचिह्नविधिः ।
"सिंहारूढा ध्वजे यस्य नृपस्य रिपुहा उमा ।
हारक्षा पूज्यते वत्स ! न तस्य रिपुजं भयम् ॥
कपिसंस्था महामाया सर्व्वशत्रुविनाशिनी ।
वृषे यथेप्सितं दद्यात् कपसी श्रेय उत्तमम् ॥
हंसे विद्यार्थकामस्तु बर्हिणे सुतमिष्टदा ।
गरुडगा महामाया सर्व्वरोगविनाशिनी ॥
महिषस्था महामारीः शमयेत ध्वजसंस्थिता ।
करिगा सर्व्वकार्य्येषु नृपैः कार्य्या त्रिशूलिनी ॥
पङ्कजा चर्चिका रौप्या धर्म्मकामार्थमोक्षदा ।
प्रेतस्था सर्व्वभयहा नित्यं पशुनिपातनात् ॥
पूजिता देवराजेन्द्रनीलोत्पलकराम्बरा ।
भवते सिद्धकामस्य चिह्नाग्रे संव्यवस्थिता ॥
गन्धपुष्पार्च्चितं कृत्वा वस्त्रहेमसुपूर्च्चितम् ।
फलशालियवस्तम्बवर्द्धमानविभूषितम् ॥
शोभने उच्छ्रयेद्दण्डे पताकां वा मनोरमाम् ॥
चामरं कलशं शङ्खमातपत्रं वितानकम् ।
भवते सिद्धकामस्य नृपस्य फलदायकम् ॥
नमो विश्वेश्वरि दुर्गे ! चामुण्डे चण्डहारिणि ॥

ध्वजं समुच्छ्रयिष्यामि वसोर्धारां सुखावहाम् ॥"

अथ ध्वजदानविधिः ।

विश्वेश्वर उवाच ।

"यद्येवं सा महाभागा ब्रह्मविष्णुपरापरा ।
तदहं श्रोतुमिच्छामि ध्वजदानं विधानतः ॥

अगस्त्य उवाच ।

यथा त्वं पृच्छसे वत्स ! तथा शृणुष्व भाषितम् ।
एषः पूर्व्वं तथा तेन शम्भुगीतं प्रकाशितम् ॥
शुक्रस्य भावयुक्तस्य तदहन्ते महात्मनः ।
कथयामि यथान्यायं ध्वजदानं महाफलम् ॥

शुक्र उवाच ।

देव्या ध्वजप्रमाणन्तु विधिदत्तस्य लाञ्छनम् ।
दीयते च यथा नाथ ! तदशेषं ब्रवीहि नः ॥

ईश्वर उवाच ।

चण्डजं कमिरुं वापि ध्वजं केशविवर्ज्जितम् ।
नवं सभञ्च शस्त्राच प्रासादाद्दण्डवर्द्धितम् ॥
मध्ये स्वस्त्यां महत् शुभ्रं शैलं वा धातुजं हि वा ॥
तस्मिन् पटे लिखेत् सिंहं सर्व्वलक्षणलक्षितम् ।
रोचनां सह चन्द्रेण हेमलेखाद्यदूर्व्वया ॥
प्रासादाद्धीनमानन्तु चितिं विस्तरतः करम् ।
ध्वजाधारेण कर्त्तव्या दर्शयेद्दिक्षु देवताः ॥
सर्व्वा वाहनलाञ्छेन लाञ्छिताः सहजेन च ।
किङ्किणीचामरोपेता घण्टादर्पणशोभिताः ॥
कृतहोमो महाप्राज्ञः सहकारदलान्वितान् ।
महामङ्गलशब्देन देव्याः कुम्भान् प्रपूजयेत् ॥
सुगन्धपुष्पनैवेद्यधूपविभवविस्तरैः ।
कन्यका ब्राह्मणान् भोज्य दधिपायसशर्करैः ॥
भूतानान्तु बलिं दत्त्वा तथा तत्समरोहयेत् ॥
सर्व्वकामानवाप्नोति विद्याधरपतिर्भवेत् ।
मोदते विविधान् भोगान् सर्व्वविद्यार्थपारगः ॥
अथवा हैमं रौप्यं वा ताम्रं पार्थिवशैलजम् ।
कारयेन्मृगराजन्तु महाकरिमदापहम् ॥
मद्यानखकरोत्खातसत्त्वापवर्गप्रदम् ।
एवंविधं ततः कृत्वा नवम्यां पूजयेच्छिवाम् ॥
सोपवासः शुचिर्दक्षः पर्व्वसङ्गविवर्ज्जितः ।
कन्यकाः पूजयित्वा तु विप्रान् वेदविदस्ततः ॥
देव्या भक्ताः सदाचारा नास्तिका नरवने रताः ।
ते यथाशक्तितस्तोष्या कुमारीरथकर्म्मभिः ॥
कन्या देव्याः स्वयं प्रोक्ताः कन्यारूपा तु शूलिनी ।
यावदक्षतयोनिः स्यात्तावद्देवी सुरार्च्चिता ॥
द्विजो ब्रह्मा शिवो विष्णुः स्वकीयव्रतपालकः ।
पूजितैस्तैः सदा शुक्र सर्व्वदेवास्तु पूजिताः ॥
दीनान्धकृपणानान्तु अन्नं देयन्तु शक्तितः ।
यथा सर्व्वगता देवी तदुद्दिश्याक्षयं भवेत् ॥
नानाभक्ष्याक्षतदधिदूर्व्वाततुर्कास्थिकान्वितम् ।
बलिं वै सर्व्वभूतेभ्यो दशदिक्षु निवेदयेत् ॥
पञ्चघोषा तथा जप्ता चर्च्चिकाचर्च्चरापि वा ।
सिंहं स्तम्भं समारोप्य सर्व्वमङ्गलशब्दितम् ॥
वेदध्वनिमहामन्त्रकालिकाचण्डिकापरम् ।
अस्य सिंहं परं ध्यायेद्यथाद्यं पूर्व्वकल्पितम् ।
एतन्तु वस्त्रसंवीतं सर्व्वाभरणभूषितम् ।
देव्या महाध्वजं न्यस्य शेषाणामपि विन्यसेत् ॥
ब्रह्मविष्णवीन्द्ररुद्राणां सोमसूर्य्यदिवौकसाम् ।
ध्वजदानं महादानं सर्व्वदानोत्तमं मतम् ॥
यावन्तो दीयते शुक्र ! ध्वजः प्रासादमूर्द्धनि ।
तावत्तु न भवेद्वत्स ! प्रासादो देववाञ्छितः ॥
शून्यभवं सदा भूता नानागन्धर्व्वराक्षसाः ।
विशन्ति महात्मानो नानाबाधाश्च कुर्व्वते ॥
तस्माद्देवगृहद्वारपुरपर्व्वतपत्तने ।
उच्छ्रिताः शान्तिकामाय ध्वजाः शुक्र ! सदा
हिताः ॥
न हि चान्यद्ध्वजदानादुत्तमं भारते क्वचित् ।
दानमिष्टञ्च पुष्टञ्च देव्या दीयमानेव च ॥
अनेन विधिना यस्तु ध्वजं शुक्र ! निवेदयेत् ।
सर्व्वकामानवाप्नोति स नरः शिवतां व्रजेत् ॥
तस्य दर्शनसम्भाषादपि पापरता नराः ।
विमुक्ताः सर्व्वपापेभ्यो दिवं यान्ति न संशयः ॥
राज्ञा चानेन विधिना देवीलाञ्छनराजिताम् ।
शङ्खपङ्कजभार्गहंसबर्हिणवारणैः ।
साचारो भक्तिमास्थाय ध्वजयष्टिं समुच्छ्रयेत् ।
न तस्य सङ्गरे शुक्र ! व्याधयो न च वैरिणः ।
नैव शत्रुग्रहपीडा भवेद्यो स समुच्छ्रयेत् ॥"

इति देवीपुराणम् ॥

ध्वजद्रुमः, पुं, (ध्वज इव उन्नतो द्रुमः । दीर्घत्वात् तथात्वम् ।) तालवृक्षः । माडवृक्षः । इति राजनिर्घण्टः ॥

ध्वजप्रहरणः, पुं, (ध्वजं प्रहरति नाशयति भनक्तीति । प्र + हृ + ल्युः । ध्वजस्य प्रहरणो वा ।) वायुः । इति शब्दरत्नावली ॥

ध्वजभङ्गः, पुं, (ध्वजस्य मेढ्रस्य भङ्गः ।) क्लीवत्वजनकरोगविशेषः । तस्य निदानं यथा,—
"अत्यम्ललवणक्षारविरुद्धाशनभोजनात् ।
तथाम्बुपानाद्विषमात् पिष्टान्नगुरुभोजनात् ॥
दधिक्षीरानूपमांससेवनाद्व्याधिकर्षणात् ।
कन्यायोनिगमनाच्चापि विंयोनिगमनादपि ॥
दीर्घरोम्णीं चिरोत्सृष्टां तथैव च रजस्वलाम् ।
दुर्गन्धां दुष्टयोनिञ्च तथैव च परिस्रुताम् ॥
ईदृशीं प्रमदां मोहात् यदि गच्छति मानवः ॥
चतुःपदाभिगमनाच्छेफसश्चाभिघाततः ।
अधावनाच्च मेढ्रस्य शस्त्रदन्तनखक्षतात् ॥
काष्ठप्रहारनिष्पेषशूकानाञ्च निषेवणात् ।
रेतसश्च प्रतीघातात् ध्वजभङ्गः प्रवर्त्तते ॥"

इति चरकः ॥ * ॥

तस्य चिह्नं यथा,—
"शुक्रे चिरात् प्रसिच्येत शुक्रं शोणितमेव वा ।
तोदोऽत्यर्थं वृषणयोर्मेढ्रं धूपायतीव च ॥"

इति वाभटः ॥ * ॥

अपि च ।
"तैस्तैर्भावैरहृद्यैश्च रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यतो नृणां क्लैब्यं सद्यः प्रजायते ॥
भक्ष्यैरम्लोष्णलवणैरतिमात्रोपसेवितैः ।
सौम्यधातुक्षयाद्दृष्टः क्लैब्यं तदपरं स्मृतम् ॥
अतिव्यवायशीलो यो न च वाजिक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥